No. ४९ख

Title समास-चक्रम्

Author

Extent ४पत्र Age सं. १९२९

Subject व्याकरण

शमास चक्राम

॥४ली॥

४ कागद

6188

१८ — ४

Complete

१८

५

नं. ४३८
समासचक्र
४ पत्राणि
सं० १९२९ वि

समासचक्रम् प० ४ श्लो० ८५
नं ४५



स॰ च॰

ॐ श्रीगणेशाय नमः ॥ अथ प्रयोगविधिः ॥ प्रयोगास्त्रिविधः । कर्त्तरि प्रयोगः । कर्मणि प्रयो
गः । भावे प्रयोगः । तत्र कर्त्तरि प्रयोगः सकर्मकाकर्मकभेदेन द्विधा । सकर्मककर्त्त
रि प्रयोगो यथा कृष्णो भक्तान्नत्ति । अकर्मककर्त्तरि प्रयोगो यथा कृष्णस्तिष्ठ
ति । कर्मणि प्रयोगो यथा विष्णुना प्रपंचः क्रियते । भावे प्रयोगो यथा कृष्णेन स्थीयते ।
इति प्रयोगप्रकारः ॥ आदौ कर्त्तरि पदं वाच्यं द्वितीयादिपदं ततः । क्त्वातुमुन्ल्यप्म
ध्येतु कुर्यात्पदं ते क्रियापदं १ विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरं । कर्त्तृकर्मक्रिया
युक्तमेतदन्वयलक्षणम् २ यल्लिंगं यद्वचनं या च विभक्तिर्विशेष्यस्य तल्लिंगं
तद्वचनं सा च विभक्तिर्विशेषणस्यापि ३ । अथ समासचक्रम् ॥ षोडश समासाः सं
क्षेपाद्दश विंशतिधा पुनः । नित्यानित्यत्वभेदेन लुगलुक्त्वेन च द्विधा १ तत्रा
ष्टधा तत्पुरुषः सप्तधा कर्मधारयः सप्तधा च बहुव्रीहिर्द्विगुराभाषितो त्रिधा २
द्वंद्वोपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः । तेषां पुनः समासानां प्राधान्यस्या
च्चतुर्विधम् ३ । तत्र पूर्वपदप्रधानोऽव्ययीभावः । उत्तरपदप्रधानस्तत्पुरुषः ।
उभयपदप्रधानो द्वंद्वः । अन्यपदप्रधानो बहुव्रीहिः ॥ तत्र द्विगुकर्मधारयो त

शिव॰ १

तत्राष्टविधस्तत्पुरुषो यथा । प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुष
श्चतुर्थीतत्पुरुषः पंचमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्तत्पुरुषश्चे
ति ॥ प्रथमातत्पुरुषो यथा । अर्द्धं पिप्पल्याः अर्द्धपिप्पली । अर्द्धं कोशातक्याः
अर्द्धकोशातकी । द्वितीयातत्पुरुषो यथा कष्टं श्रितः । कष्टश्रितः । ग्रामं ग
तो ग्रामगतः । सुखं प्राप्तः सुखप्राप्तः । सुखमापन्नः सुखापन्नः । तृतीयातत्पुरुषो
यथा शंकुलया खंडः शंकुलाखंडः । धान्येनार्थो धान्यार्थः ॥ चतुर्थीतत्पु
रुषो यथा । यूपाय दारुः यूपदारुः । कुंडलाय हिरण्यं कुंडलहिरण्यं ॥ पंचमी
तत्पुरुषो यथा चौराद्भयं चौरभयं । वृकाद्भीतिः वृकभीतिः ॥ षष्ठीतत्पुरुषो
यथा । आम्रस्य फलं आम्रफलम् । पनसस्य फलं पनसफलम् । सप्तमीतत्पु
रुषो यथा । अक्षेषु शौंडः अक्षशौंडः । विद्यायां कुशलो विद्याकुशलः ॥
नञ्तत्पुरुषो यथा । न ब्राम्हणोऽब्राम्हणः । न वृषलोऽवृषलः । न अ
श्वः अनश्वः । पापस्याभावोऽपापम् ॥ धर्मविरुद्धोऽधर्मः ॥ ।

सप्तधा कर्मधारयो यथा। विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उप
स॰ च॰ मानपूर्वपद उपमानोत्तरपदः संभावनापूर्वपदो ऽवधारणापूर्वपदश्चेति॥
२ विशेषणपूर्वपदः कर्मधारयो यथा॥ कृष्णश्चासौ सर्पश्च कृष्णसर्पः। कृष्णौ
च तौ सर्पौ च कृष्णसर्पौ। कृष्णाश्च ते सर्पाश्च कृष्णसर्पाः। रक्ता च सा लता च
2 रक्तलता। रक्ते च ते लते च रक्तलते। रक्ताश्च ता लताश्च रक्तलताः। नीलं च
तदुत्पलं च नीलोत्पलम्। नीले च ते उत्पले च नीलोत्पले। नीलानि च ता
नि उत्पलानि च नीलोत्पलानि॥ विशेष्यपूर्वपदः कर्मधारयो यथा।
वैयाकरणश्चासौ खसूचिश्च वैयाकरणखसूचिः॥ मीमांसकश्चासौ दु
र्दुरूढश्च मीमांसकदुर्दुरूढः॥ विशेषणोभयपदो यथा॥ उत्खा
तश्चासौ प्रतिरोपितश्च उत्खातप्रतिरोपितः॥ सुप्ता च उत्थिता च सु
त= प्तोत्थिता॥ शीतं च तदुष्णं च शीतोष्णम्॥ उपमानपूर्वपदः कर्म

शंख इव पांडुरः शंखपांडुरः । मेघ इव श्यामो मेघश्यामः । चंद्र इव मुखं चंद्रमुखम् ॥ उ
पमानोत्तरपदकर्मधारयो यथा । पुरुषो व्याघ्र इव पुरुषव्याघ्रः ॥ ना पुरुषः सिंह इव नरसिं
हः ॥ पादः पद्ममिव पादपद्मम् ॥ संभावनापूर्वपदकर्मधारयो यथा ॥ नय इति गुणो न
यगुणः । मथुरेति नगरी मथुरानगरी । शार्ङ्गमिति धनुः शार्ङ्गधनुः ॥ अवधा
रणपूर्वपदकर्मधारयो यथा ॥ गुण एव पदं गुणपदम् । विद्यैव धनं विद्याधन
म् ॥ मध्यमपदलोपसमासो यथा ॥ शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूज
को ब्राह्मणो देवब्राह्मणः ॥ सप्तधा बहुव्रीहिर्यथा । द्विपदो बहुपदः सहपूर्वपदः
। संख्योत्तरपदः संख्योभयपदो व्यतिहारलक्षणो दिगंतरालक्षणश्चेति । द्विपदब
हुव्रीहिः षड्विधाः ॥ द्वितीयाबहुव्रीहिः तृतीयाबहुव्रीहिश्चतुर्थीबहुव्रीहिः पंच
मीबहुव्रीहिः षष्ठीबहुव्रीहिः सप्तमीबहुव्रीहिश्चेति ॥ द्वितीयाबहुव्रीहिर्यथा
प्राप्तमुदकं यं सः प्राप्तोदकः ग्रामः । आरूढो वानरो यं स आरूढवानरो वृक्षः
। तृतीयाबहुव्रीहिर्यथा जितः कामो येन स जितकामः । जितः कामो यया सा

दंयेन तज्जितं पदं ॥ चतुर्थीबहुव्रीहिर्यथा ॥ उपहृतः पशुर्यस्मै स उपहृतपशुः ॥ पंचमीबहुव्री
स·च· ३ हिर्यथा । निष्क्रांतो जनो यस्मात्स निष्क्रांतजनो ग्रामः ॥ षष्ठीबहुव्रीहिर्यथा चित्रा गावो य
स्य सः चित्रगुः ॥ पीतमंबरं यस्य सः पीतांबरः ॥ शुक्लः पटो यस्य सः शुक्लपटः ॥ शुक्लौ
३ पटौ ययोस्तौ शुक्लपटौ ॥ शुक्लाः पटा येषां ते शुक्लपटाः । शुक्लः पटो यस्याः सा शुक्ल
पटा । शुक्लौ पटौ ययोस्ते शुक्लपटे । शुक्लाः पटा यस्यां ताः शुक्लपटाः । शुक्लः पटो
यस्य तत् शुक्लपटम् । शुक्लः पटो ययोस्ते शुक्लपटे ॥ शुक्लाः पटा येषां तानि शुक्ल
पटानि ॥ सप्तमीबहुव्रीहिर्यथा ॥ वीराः पुरुषा यस्मिन् स वीरपुरुषो ग्रामः ॥ ब
हुपदो बहुव्रीहिर्यथा । निर्जितः कालमेघो येन स निर्जितकालमेघः ॥ सहपूर्वप
दो यथा शिष्येण सह वर्त्तत इति सशिष्यः ॥ संख्यान्तरपदो यथा । दशानां समीपे
वर्त्तमानाः उपदशाः ॥ संख्योभयपदो यथा ॥ द्वौ वा त्रयो वा येषां ते द्वित्र्याः । त्रयश्च
त्र्य= त्वारो वा येषां ते त्रिचत्वाराः । व्यतिहारलक्षणो यथा केशेषु केशेषु प्रवर्त्तं युद्धं केशा
केशि ॥ दंडैश्च दंडैश्च प्रहृत्य प्रवर्त्तं दंडादंडि ॥ दिगंतरलक्षणो यथा । दक्षिणस्याः
पूर्वस्याश्च दिशोर्यदंतरालं दक्षिणपूर्वा ॥

पाव· ३

त्रिविधो द्विगुसमासः ॥ तद्धितार्थविषयः सोत्तरपदलक्षणः समाहारश्चेति ॥ तद्धितार्थविषयो यथा ॥
पंचसु कपालेषु संस्कृतः पंचकपालः पुरोडाशः ॥ सोत्तरपदो यथा । पंच गावो धनं यस्य स
पंचगवधनः ॥ समाहारो यथा ॥ पंचानां पुरीणां समाहारः पंचपुरी ॥ त्रयाणां लोकानां समाहा
त्रि॰ रः त्रैलोकी । पंचानां पात्राणां समाहारः पंचपात्रं ॥ इति द्विगुः ॥ द्वन्द्वोपि द्विविधः ॥ इतरे
तरद्वन्द्वः समाहारद्वन्द्वश्चेति ॥ इतरेतरद्वन्द्वो यथा रामश्च कृष्णश्च रामकृष्णौ ॥ दे
वकी च वसुदेवश्च यशोदा च नंदगोपश्च रोहिणी च बलभद्रश्च देवकीवसुदेवयशोदा
नंदगोपरोहिणीबलभद्राः ॥ समाहारद्वंद्वो यथा शंखश्च पटहश्च शंखपटहम् ॥
पाणी च पादौ च पाणिपादं । अव्ययीभावो द्विविधः ॥ अव्ययपूर्वपदो ऽव्ययोत्तरप
दो ऽव्ययोभयपदश्चेति ॥ अव्ययपूर्वपदो यथा ॥ कृष्णस्य समीपे उपकृष्णं । कुंभ
स्य समीपे उपकुंभं । शक्तिमनतिक्रम्य यथाशक्ति ॥ मक्षिकाणामभावो निर्म
क्षिकं ॥ अव्ययोत्तरपदो यथा ॥ सूपस्य लेशः सूपप्रति ॥ अनव्ययोभयपदो यथा ॥
द्वौ द्वौ मुनी वंश्यौ द्विमुनि ॥ उपपदसमासो यथा ॥ कुंभं करोतीति कुंभकारः ॥ नित्यस

वत्तस्य मूलं वत्तमूलम्॥ अलुक्समासो यथा॥ कण्ठे स्थितः कण्ठेस्थितः॥ अथ समा
सांतां प्रत्ययाः॥ अंगगात्रोदरस्तनकंठोष्ठमुखदंताक्षिकेशाः स्त्रियां बहुव्रीहौ ईकारा
न्ता भवन्ति। सन्नतमंगमस्याः सा सन्नतांगी। सुगात्री क्षामोदरी। पीवरस्तनी।
किन्नरकंठी। बिंबोष्ठी। चंद्रमुखी। सुदंती। आयताक्षी। सुकेशी। एमेव रूप
स्याः सारं मोरूः। ऋक्। पुर। अप्। धुर। पथिन्। राजन्। अहन्। सखि एते
शब्दाः अकारांता भवंति॥ अर्धर्चः। देवस्य पूः देवपुरं। निर्मला आपो य
स्मिन् निर्मलापं सरः॥ रथस्य धूः रथधुरा॥ देवानां पन्थाः देवपथः॥ राज्ञां राजा
राजराजः॥ पुण्यं च तद् अहश्च पुण्याहं। सुदिनं च तद् अहश्च सुदिनाहं॥ वायोः सखा वा
युसखः॥ अक्षि सक्थि अग्नि नाभि शब्दाः। पुल्लिंगे बहुव्रीहौ अकारांता भवंति॥
दीर्घसक्थि यस्य सः दीर्घसक्थः॥ पुंडरीकमिवाक्षिणी यस्य सः पुंडरीकाक्षः। पद्मं
नाभौ यस्य सः पद्मनाभः॥ इति श्री समासचक्रं समाप्तम्॥ तैलाद्रक्षेज्जलाद्रक्षेद्र
क्षेच्छिथिलबंधनात्। मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम्॥ १ लिखितं पाठार्थं
ब्रोहित शालिग्रामेण॥ जम्बूल्येते॥ शुभमस्यात्॥

शिव ४